पृथक् पृथग्विभागेन कर्त्तव्यं साम्यतः परम् ॥
त्रिविधं कीर्त्तितं चैव कृत्रिमञ्च ततःपरम् ।
त्रिविधं कीर्त्तितं शास्त्रे विषज्ञानविचक्षणैः ॥
स्थावरं कन्दजं प्रोक्तं जङ्गमं सत्त्वसंस्थितम् ।
कृत्रिमं योगजं प्रोक्तं त्रिविधं विषमुच्यते ॥
यदा स्थिरं समश्नन्ति कदाचित्तुरगोत्तमाः ।
तदा कार्य्यं विधानज्ञैरगदस्य प्रयोजनम् ॥
केशरं पद्मनालञ्च सौपर्णी वदरीफलम् ॥
तक्रमिश्रं हये दत्तं सर्व्वथा विषनाशनम् ॥
सौपर्णी सिन्धुवारञ्च नागवल्ली जटा तथा ।
विषार्त्तं प्राप्य संमिश्रं दुग्धे स्यादायुधी हयः ॥
अश्वगन्धा रुहा एला घृतमिश्रा प्रयोजिता ।
विषनाशं नयत्याशु जङ्गमं हयगात्रतः ॥
मूलं चन्दनवृक्षस्य माषचूर्णपरिप्लुतम् ।
जङ्गमस्य विषस्याशु प्रकरोति च संचयम् ॥
तक्रं केशरसंयुक्तं विषं सद्यो नवाभ्रकम् ।
हयस्य जङ्गमं नाशं विषन्नयति तत्क्षणात् ॥
सौपर्णी विषकङ्कोली पिष्टा मद्येन भाविता ।
जङ्गमं गात्रतः कृत्स्नं विषं नयति तत्क्षणात् ॥
एला कङ्कोलिकामूलं सौपर्णीघृतमिश्रितम् ।
विषनाशं करोत्याशु नस्यदानेन वाजिनाम् ॥
कौसुम्भं केशरं लाक्षा माक्षिका नाकुली तथा ।
कृत्रिमस्य विषस्याशु प्रकरोति च संचयम् ॥
चम्पकं मालतीमूलमुन्मत्तकरसं तथा ।
अश्वानां नाशयत्याशु विषं जङ्गममाश्रितम् ॥”

इति श्रीनकुलकृतेऽश्वचिकित्सिते विषयोगाध्यायः षोड़शः ॥

अथ अश्वशालाविधिः ।

“नृपवेश्मवामभागे शुभदिने तु कारयेद्धयागारम् ।
पूज्यश्रियं प्रयत्नादुच्चैःश्रवसं प्रतिष्ठाप्य ॥
सुशुभे भूमिविभागे पूर्व्वोत्तरजलप्लवविधानात् ।
तस्मिन् शालां चित्रां दशहस्तसमुच्छ्रितां दृढ़ां कुर्य्यात् ॥
खादनकोष्ठकमस्मिन् हस्तद्वितयं समुच्छ्रितं कुर्य्यात् ।
संस्थाप्य वृषभगावौ सप्ताहं वाजिशालायाम् ॥
अत ऊर्द्ध्वन्तु हुताग्निः प्रवेशयेद्वाजिनो यथायोग्यम् ।
कुशलैस्तत्रमैर्दचैरनुकूलैः स्थानपालैश्च ॥
कृतमङ्गलसंस्कारा वध्यास्तेऽत्र चोत्तराभिमुखाः ।
नात्यायता न शिथिलाः स्थाने वा दक्षिणाभिमुखम् ॥
वैद्यानां तुरगाय समीपं गृहं कारयेत् पूर्व्वम् ।
कार्य्पासिकेन सूत्रेण माक्षिकाणां निवारणम् ॥
गन्धैर्माल्यैर्धूपैः स्थानानि विभूषयेदलङ्कारैः ।
सविशेषं त्वद्यपीतौ हुत्वाग्निं पूरयेद्विद्वान् ॥
स्वच्छन्दं नातियवसं यथा पश्यन्ति वाजिनः ।
स्थानं चैव पृथक् प्राप्तं प्रयत्नं रोगिणां न वै ॥
कोष्ठी कुष्ठी ज्वरी यक्ष्मी परस्परं दूषयन्ति चारैः ।
तिथिवारे केशांश्च खुरांश्च प्रशन्ति दीर्घान् ॥
अश्वस्याङ्गं प्रलिपेद्धरिद्रया वरिष्ठया मङ्गल्याच ।
सुपवित्रान् दोषघ्नैर्विभूषयेदलङ्कारैः ॥”

इति श्रीनकुलकृतेऽश्वचिकित्सितेऽश्वशालाविधिरष्टादशोऽध्यायः ॥ सप्तदशाध्यायस्तु नाधिगम्यते ॥

अथ ग्रहनामलक्षणानि ।

“दृश्यन्ते यानि लिङ्गानि ग्रहदोषेण वाजिनाम् ।
तानि सम्यक् प्रवक्ष्यामि ग्रहनामानि यानि तु ॥
लोहिताक्षो विरूपाक्षो हरिर्वलिस्तथैव च ।
सकाशी चैव विख्यातः सङ्काशी च परः स्मृतः ॥
सुसंस्थितश्च कौवेरो वैशाखश्च रुद्रग्रहः ।
ऊर्द्ध्वश्च दारुणश्चैव षड़्विधो वरुणग्रहः ॥
वृहस्पतिश्च सोमश्च तथा सूर्य्यग्रहोऽपरः ।
एते प्रोक्ता ग्रहाः सर्व्वे दारुणा मुनिसत्तमैः ॥
एतैर्दृष्टाः स्फुटं वाहा नैव जीवन्ति सर्व्वदा ।
चिह्नं सर्व्वं प्रवक्ष्यामि यथा शास्त्रे व्यवस्थितम् ॥
कम्पते पूर्व्वकायस्तु निश्चलो यस्य पश्चिमः ।
पश्चाल्लङ्घी सकम्पश्च खिद्यते हरिपीड़ितः ॥
भवन्ति विन्दवो रक्ता अकस्माद् यस्य चक्षुषः ।
हरिताक्षगृहीतोऽश्वो ग्रासद्वेषी च जायते ॥
प्रस्विन्नगुरुगात्रश्च लुब्धचङ्क्रमणक्रियः ।
मीलतोन्मीलतां याक्ष्णा स्वभावान्नित्यमेव च ॥
विरूपाक्षगृहीते तु कम्पः स्वेदश्च जायते ।
उत्थितः सहसा यस्तु मूर्च्छा पतति भूतले ॥
स्तब्धाक्षो मुच्यते केशैस्तथा वालैः खुरैरपि ।
वलिग्रहगृहीतोऽसौ स्तब्धकर्णशिरोधरः ॥
अकस्माद् यस्य लोमानि शीर्य्यन्ते यश्च लङ्घति ।
शूनपश्चिमपादश्च तस्य काशिग्रहं वदेत् ॥
सहसा कुपितो वाजी स्वानि गात्राणि खादति ।
शीयत सततश्चैव सङ्काशिग्रहपीडितः ॥
खिन्नाङ्गो वेपमानश्च जानुभ्यां यश्च तिष्ठति ।
कौवेरग्रहसन्दुष्टं तं विद्यात् कष्टजीवितम् ॥
ह्रेषते सततं यस्तु पश्चादात्मानमीक्षते ।
सुसंस्थितग्रहाविष्टः स विज्ञेयो मनीषिभिः ॥
स्तब्धेन गुरुणा चैव वेपमानेन पक्षितः ।
गात्रेण विद्याद् वाहं तु वैशाखग्रहसेवितम् ॥
ग्रीवां चैव तथा जिह्वां परिवर्त्त्य मुहुर्मुहुः ।
जृम्भते पूर्व्वकायेन शीतोच्छ्वासी विशोचनः ॥
नोद्विजेत्वाहतः पृष्ठे कशया पाणिनापि वा ।
तं वै दीर्घस्वरग्रस्तं दृष्ट्वैव परिवर्जयेत् ॥
श्यामं जिह्वामुखं यस्य नष्टदृष्टिस्मृतिर्भवेत् ।
ऊर्द्ध्वग्रहकृतं दोषं तस्य दीनस्य निर्द्दिशेत् ॥
तालुजिह्वे च नेत्रे च वृषणौ मेढ्रमेव च ।
श्यावं रूपञ्च यस्य स्याद् गात्रगौरवमेव च ॥
तस्य स्वेदपरीतस्य बुद्धिमान् वरुणग्रहैः ।
कृतं दोषं महाघोरं स्तब्धाङ्गस्य विनिर्द्दिशेत् ॥
ह्रेषते सततं यस्तु हृष्टरोमा तुरङ्गमः ।
स्तब्धाक्षो जृम्भतेऽत्यर्थं तस्यापि सलिलग्रहः ॥
सुविस्फुरितसर्व्वाङ्गः सलिले निश्चलस्थितः ।
ह्रेषते विस्तरं वाजी वरुणग्रहपीड़ितः ॥
मुहूर्त्तावस्थितस्तोये जानुभ्यां योऽवगच्छति ।
मुखपाकश्च यस्यान्ते तं विद्यादुदकग्रहम् ॥
उद्वर्त्तिताक्षः खिन्नश्च संगृहीतचतुश्च यः ।
कम्पमानश्च यो वाजी स रविग्रहपीड़ितः ॥
स्तब्धग्रीवो न जानाति कशाघातं सुदुर्म्मनाः ।
जलग्रहगृहीतोऽश्वो वामपार्श्वेन निश्चलः ॥
शूनाक्षिकूटो रक्ताक्षः कृशः स्खलति यो मुहुः ।
वृहस्पतिगृहीतोऽसौ नैव जीवति तादृशः ॥
कम्पते पूर्व्वकायेन स्वल्पपानाशनश्च यः ।
शेते प्रसार्य्य गात्राणि शीताङ्गः सोमपीड़ितः ॥
रक्ताक्षः शूनकण्ठश्च कम्पमानश्च श्वासयुक् ।
फेनतीव्राङ्गखेदश्च ग्रस्तः सूर्य्यग्रहेण सः ॥
उदके तत्समीपे वा प्रायो गृह्णाति दारुणः ।
तुरङ्गं सत्त्वहीनन्तु षड़्विधो वारुणग्रहः ॥
यज्ञभूमिचिताचैत्यशून्यवेश्मसुरालये ।
लोहिताक्षादयो रोषाद् ग्रहा गृह्णन्ति वाजिनः ॥
एवंविधैर्निदानैस्तु ग्रहदोषं विनिर्द्दिशेत् ।
वातपित्तकफानान्तु निदानैर्व्याधिमादिशेत् ॥
एकाकारेण रोगेण म्रियते वा हयो यदा ।
तुरङ्गाणां तदा ज्ञेया उपसर्गाः सुदारुणाः ॥
ग्रहदोषेषु सर्व्वेषु उपसर्गास्तथैव च ।
अथोक्ताश्च महाशान्तिं गान्धर्व्वीञ्च प्रयोजयेत् ॥
अश्वरक्षाविधानाय ऋचं सम्मान्य पावकम् ।
जुहुयाद्घृतसंयुक्तं शुचिः स्नात्वा सुपूजितः ॥
शान्तिकं कारयेत् कर्म्म वलिञ्चापि प्रयोजयेत् ।
ग्रहदोषेषु सर्व्वेषु शान्तिकर्म्माणि कारयेत् ॥
देवद्विजप्रव्रजितगुरुवृद्धान् यतीनपि ।
तोषयेद्भोजनैर्दानैर्वस्त्रगोकाञ्चनादिभिः ॥
रात्रौ शालासमीपे तु वलिं दद्यात् चतुर्द्दिशम् ।
मत्स्यमांसैश्च पक्वान्नैः कृशरैः पायसादिभिः ॥
त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा ।
नीराजनविधिं कृत्वा नयेदश्वान् पृथक् पृथक् ॥”

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे ग्रहगृहीतचिकित्सिते सप्तपञ्चाशत्तमोऽध्यायः ॥)

घोटिका, स्त्री, (घोटते परिवर्त्तते कुद्दादिगुणैरिति । घुट् + ण्वुल् । ततष्टापि अत इत्वम् ।) हयभेदः । तत्पर्य्यायः । कर्कटी २ तुरङ्गी ३ चतुरङ्गा ४ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । मधुरत्वम् । वातव्रणकण्डुकुष्ठास्रश्वयथुनाशित्वञ्च । इति राजनिर्घण्टः ॥

घोणा, स्त्री, (घोणते गृह्णाति वस्तुगन्धम् । घुण् + अच् टाप् च । घोणतेऽनया इति करणे घञ् वा ।) नासा । (यथा, महाभारते । १ । १५६ । ३३ ।
“दीर्घघोणं महोरस्कं विकटोद्बद्धपिण्डिकम् ॥”
“घोणायां द्वे ॥” इति सुश्रुते शारीरस्थाने पञ्चमाध्याये ॥) अश्वनासिका । तत्पर्य्यायः । प्रोथः २ । इत्यमरः । २ । ८ । ४८ ॥ (यथा, अश्ववैद्यके । २ । ७ ।
“नासाच्छिद्राक्षिमध्ये तु घोणाख्यः समुदाहृतः ।
घोणापार्श्वगतौ गण्डौ चौरिके च ततः परम् ॥”)

घोणी, [न्] पुं, (प्रशस्ता घोणा अस्त्यस्य इति । “व्रीह्यादिभ्यश्च ।” ५ । २ । ११७ । इति इनिः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

घोण्टा, स्त्री, (घुण्यते गृह्यते भक्षणायेति । घुण् + वाहुलकात् टः ।) वृक्षविशेषः । शेयाकुल